# ॥ સૂર્ય અષ્ટકમ ॥

શ્રી ગણેશાય નમ:

સાંબ ઉવાચ

આદિદેવં નમસ્તુભ્યં પ્રસીદ મમ ભાસ્કર ।
દિવાકર નમસ્તુભ્યં પ્રભાકર નમોઽસ્તુતે ॥ 1 ॥

સપ્તાશ્વ રથં આરૂઢં પ્રચન્ડં કશ્યપ આત્મજમ ।
શ્વેતપદ્મ ધરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 2 ॥

લોહિતં રથં આરૂઢં સર્વ લોક પિતામહમ ।
મહાપાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 3 ॥

ત્રૈગુણ્યં ચ મહાશૂરં બ્રહ્મા વિષ્ણુ મહેશ્વરમ ।
મહાપાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 4 ॥

બૃંહિતં તેજ: પુન્જં ચ વાયું આકાશં એવ ચ ।
પ્રભું ચ સર્વલોકાનાં તં સૂર્યં પ્રણમામ્યહમ ॥ 5 ॥

બન્ધૂક પુષ્પ સન્કાશં હાર કુન્ડલ ભૂષિતમ ।
એકચક્ર ધરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 6 ॥

તં સૂર્યં જગત કર્તારં મહાતેજ: પ્રદીપનમ ।
મહાપાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 7 ॥

તં સૂર્યં જગતાં નાથં જ્ઞાન વિજ્ઞાન મોક્ષદમ ।
મહાપાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહમ ॥ 8 ॥

સૂર્યાષ્ટકં પઠેન્નિત્યં ગ્રહપીડા પ્રણાશનમ ।
અપુત્રો લભતે પુત્રં દરિદ્રો ધનવાન્ભવેત ॥ 9 ॥

આમિશં મધુપાનં ચ ચઃ કરોતિ રવેર્દિને ।
સપ્તજન્મ ભવેદ્રોગી પ્રતિજન્મ દરિદ્રતા ॥ 10 ॥

સ્ત્રીતૈલમધુમાંસાનિ ચસ્ત્યજેત્તુ રવેર્દિને ।
ન વ્યાધિઃ શોકદારિદ્રયં સૂર્યલોક સ ગચ્છતિ ॥ 11 ॥

ઈતિ શ્રી સૂર્યાષ્ટકં સંપૂર્ણમ